# आदर्श प्रश्नपत्रम् (2026-27)

**कक्षा-एकादशी** **कोड न. - 526**

रोलनं० | | | | | |

# संस्कृतम्

समयः -होरात्रयम्] [पूर्णाङ्काः -80

---

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ 9 तथा प्रश्न 16 हैं।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गये कोड नम्बर तथा सेट को छात्र उत्तर पुस्तिका के मुख्य पृष्ठ पर लिखें।
- कृपयाप्रश्नकाउत्तरलिखनाशुरूकरनेसेपहले, प्रश्न का क्रमाङ्क अवश्य लिखें।
- उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्नें न छोड़ें।
- उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर नकाटें।
- परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।
- कृपया प्रश्नों के उत्तर देनें से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।**

---

- **सामान्यनिर्देशाः:–**

  (i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
  (ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
  (iii) श्रेष्ठाङ्कान् प्राप्तये सुस्पष्टः लेखः लेखनीयः।

- **अस्मिन्प्रश्नपत्रेपञ्चखण्डाःसन्ति :–**

| | | |
|---|---|---|
| खण्डः 'क' | अपठित-अवबोधनम् | - 10 अङ्काः |
| खण्डः 'ख' | रचनात्मक-कार्यम् | - 17 अङ्काः |
| खण्डः 'ग' | पठित-अवबोधनम् | - 31 अङ्काः |
| खण्डः 'घ' | अनुप्रयुक्त-व्याकरणम् | - 06 अङ्काः |
| खण्डः 'ङ' | पाठाधारिताः बहुविकल्पीयाः प्रश्नाः | - 17 अङ्काः |

# खण्डः‘क’

# अपठित-अवबोधनम्

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि यथानिर्देशं संस्कृतेन लिखत - 10

संस्कृतभाषा भारतस्य प्राचीना समृद्धा च भाषा अस्ति। एषा केवलं भाषामात्रं न, अपितु भारतीयसंस्कृतेः दर्शनस्य विज्ञानस्य च आधारशिला अस्ति। वेदाः, उपनिषदः, रामायणम्, महाभारतम्, भगवद्गीता इत्यादयः महान् ग्रन्थाः संस्कृतभाषायामेव रचिताः सन्ति। संस्कृतभाषायां ज्ञानस्य विशालः भण्डारः निहितः अस्ति। अस्याः भाषायाः व्याकरणम् अत्यन्तं वैज्ञानिकं तर्कसंगतञ्च अस्ति। महर्षिणा पाणिनिना रचितम् “अष्टाध्यायी” नाम व्याकरणग्रन्थः विश्वप्रसिद्धः अस्ति। संस्कृतभाषा मनुष्यस्य वाणीं शुद्धां करोति, चिन्तनशक्तिं च वर्धयति। अस्याः अध्ययनं स्मरणशक्तिविकासे, उच्चारणशुद्धौ तथा भाषाकौशलेषु अत्यन्तं सहायकं भवति। संस्कृतस्य प्रभावः भारतीयभाषासु व्यापकतया दृश्यते। आधुनिकयुगेऽपि सङ्गणकविज्ञानक्षेत्रे संस्कृतभाषायाः उपयोगिता स्वीकृता अस्ति। संस्कृतभाषा विश्वबन्धुत्वस्य, नैतिकमूल्यानां तथा आध्यात्मिकज्ञानस्य प्रसाराय महत्त्वपूर्णां भूमिकां निर्वहति। अतः अस्माभिः संस्कृतभाषायाः अध्ययनं संरक्षणं संवर्धनञ्च कर्तव्यम्। संस्कृतभाषा अस्माकं गौरवपूर्णा सांस्कृतिकधरोहरः अस्ति, यां रक्षितुं प्रत्येकस्य भारतीयस्य उत्तरदायित्वम् अस्ति।

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 2×1=2

(क) भारतस्य प्राचीना भाषा का अस्ति?
(ख) अष्टाध्यायी इति व्याकरणग्रन्थस्य रचयिता कः अस्ति?
(ग) संस्कृतभाषा कस्याः वाणीं शुद्धां करोति?

(ब) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2×2=4

(क) संस्कृतभाषा भारतीयसंस्कृतेः कयोः आधारशिला अस्ति?
(ख) संस्कृतभाषायां के ग्रन्थाः रचिताः सन्ति?
(ग) संस्कृतभाषायाः संरक्षणं संवर्धनञ्च किमर्थम् आवश्यकम् अस्ति?

(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत । 1

(द) यथानिर्देशम् उत्तरत- ( केवलं प्रश्नत्रयम् ) 3×1=3

(i) "संस्कृतभाषा मनुष्यस्य वाणीं शुद्धां करोति।" इत्यत्र कर्तृपदं किम् अस्ति?

(क) संस्कृतभाषा (ख) मनुष्यस्य
(ग) वाणीं (घ) शुद्धां

(ii) "अध्ययनम्" इत्यस्य समानार्थकपदम् किम्?

(क) शिक्षणम् (ख) अधिगमः
(ग) भाषणम् (घ) भाषणम्

(iii) "विशालः" इत्यस्य विलोमपदं किम्?

(क) बृहत् (ख) महत्
(ग) लघुः (घ) दीर्घः

(iv) "भारतस्य" इति पदं कस्यां विभक्तौ अस्ति?

(क) चतुर्थी (ख) पञ्चमी
(ग) सप्तमी (घ) षष्ठी

## खण्डः 'ख'

## रचनात्मक-कार्यम्

2. रूप्यकाणि प्रेषणार्थं पुत्रस्य पितरं प्रति लिखितं निम्नलिखितं पत्रं मञ्जूषायां प्रदत्तैः पदैः पूरयत- 5

परीक्षाभवनम्

दिनाङ्कः 01-06-2026

समादरणीयाः पितृचरणाः।

सादरं चरणवन्दनम्।

मम (i) ................ परीक्षा सम्प्रति सम्पन्ना। मम सर्वाणि प्रश्नपत्राणि (ii) ..................अभवन्। अस्मिन् शीतावकाशे अहं गृहं न आगमिष्यामि। इदानीं द्वितीयसत्रस्य (iii) ................ क्रेतव्यानि सन्ति । अतः भवद्भिः यथाशीघ्रं (iv) .................. रूप्यकाणि प्रेषणीयानि। अन्यत् सर्वं (v) ................ । परिवारे सर्वेभ्यः ज्येष्ठेभ्यः नमः कनिष्ठेभ्यश्च स्वस्ति ।

भवदीयः प्रियपुत्रः

देवदत्तः

**मञ्जूषा**

| |
|---|
| पञ्चशतं, पुस्तकानि , शोभनानि, प्रथमसत्रस्य, कुशलम् |

## (छन्द-अलङ्कार-परिचयः)

3. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया पूर्णवाक्येन लिखत - (केवलं प्रश्नत्रयम्) 2×3=6
   (क) अनुष्टुप्-छन्दसि प्रतिचरणे कति वर्णाः भवन्ति?
   (ख) उपेन्द्रवज्राछन्दसः उदाहरणं किम् ?
   (ग) इन्द्रवज्राछन्दसि कति वर्णाः सन्ति?
   (घ) छन्दसि कति गणाः सन्ति ?

4. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत - (केवलं प्रश्नत्रयम्) 2×3=6

(क) अनुप्रासस्य अलङ्कारस्य उदाहरणं किम्?

(ख) यमकस्य अलङ्कारस्य लक्षणं किम् ?

(ग) उपमायाः अलङ्कारस्य लक्षणं किम् ?

(घ) ........... वैषम्येऽपि स्वरस्य यत्। (लक्षणस्य रिक्तस्थानपूर्तिं कुरुत)

## खण्डः'ग'

## पठित-अवबोधनम्

5. अधोलिखितपद्यांशस्य हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

यस्य वृत्तं न जल्पन्ति मानवाः महदद्भुतम्।

राशिवर्धनमात्रं स नैव स्त्री न पुनः पुमान् ।।

**अथवा**

मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः ।

माध्वीर्नः सन्त्वोषधीः ।।

6. अधोलिखितगद्यांशस्य हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

उष्णमश्नीयात्, उष्णं हि भुज्यमानं स्वदते, भुक्तं चाग्निमौदर्यमुदीरयति, क्षिप्रं जरां गच्छति, वातमनुलोमयति, श्लेष्माणं च परिहासयति, तस्मादुष्णमश्नीयात् ।

**अथवा**

पितृव्य! अहं पुनः प्रतिदिनमिव अद्यापि पदातिरेवागच्छन्नासम् । दुर्घटनामनु पञ्चनिमेषानन्तरमेव तत्रासादितवान् । महान् जनसम्मर्दस्तत्रासीत् । सिन्धुं प्रत्यभिज्ञाय, अहं पुनस्तद् रिक्शायानमधिरोप्य त्वरितं प्रचलितः। पितृव्य! नात्याहितं किमपि । सिन्धुः केवलं मूर्च्छामुपगतः ।

7. अधोलिखितासु सूक्तिषु मात्रद्वयोः सूक्त्योःभावार्थं हिन्दीभाषया लिखत - 2×2=4

(क) भवान् न जानाति राजपथवृत्तम्।

(ख) भो जागृतास्मि क्व धनुः क्व खड्गः।

(ग) जीवेम शरदः शतम्।

(घ) न केवलं रूपं शीलमपि तर्कयामि ।

**अथवा**

अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः उचितपदानि चित्वा पूरयत - 4×1=4

भो भो अवन्त्यो मगधाश्च बङ्गा

अङ्गा कलिङ्गा कुरुसिन्धवश्च ।

भो दाक्षिणात्याः शृणुतान्ध्रचोलाः

शृण्वन्तु ये पञ्चनदेषु शूराः ।।

**अन्वयः :-**

भो भो 1) ................ मगधाः च बङ्गा अङ्गाः 2) ................ सिन्धवः च । भो दाक्षिणात्याः 3) ................ शृणुत, ये पञ्चनदेषु शूराः 4) ................ ।

**मञ्जूषा**

| आन्ध्रचोलाः, शृण्वन्तु, कलिङ्गाः, अवन्त्यः |
|---|

8. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि श्लोकात् चित्वा संस्कृतभाषया पूर्णवाक्येन लिखत-
(केवलं प्रश्नत्रयम्) 3×1=3

संस्कृतोद्यानदूर्वा दरिद्रीकृता

निष्कुटेषु स्वयं कण्टकिन्याहिता ।

पुष्पितानां लतानां न रक्षा कृता

विस्तृता वाटिकायोजना निर्मिता ।।

के कथं कुत्र वा क्रन्दनं कुर्वते

राजनीतिश्मशानेषु न ज्ञायते । विज्ञाननौका ..........

**प्रश्नाः -**

(क) संस्कृतोद्यानदूर्वा कीदृशी कृता?
(ख) निष्कुटेषु का स्वयम् आहिता?
(ग) केषां रक्षा न कृता?
(घ) विस्तृता का निर्मिता?

9. अधोलिखितं गद्याशं पठित्वा प्रश्नानाम् उत्तराणि गद्यांशात् चित्वा संस्कृतभाषया पूर्णवाक्येन लिखत-
(केवलं प्रश्नत्रयम्) 3×1=3

तत्रस्थिताः मीनाश्च जलाभावात् मृतप्रायाः इव सञ्जाताः । सलिलतीरवासिनः पक्षिणः वायसगणाः च यावत् तान् मत्स्यान् भक्षयितुं चिन्तयन्ति स्म तावद् विषाददैन्यवशगं मीनकुलमवेक्ष्य बोधिसत्त्वः करुणायमानः चिन्तामापेदे । कष्टा बत इयम् आपद् आपतिता मीनानाम् ।

**प्रश्नाः -**

(क) तत्रस्थिताः मीनाः कथं सञ्जाताः?
(ख) सलिलतीरवासिनः पक्षिणः वायसगणाः किं कर्तुं चिन्तयन्ति स्म?
(ग) बोधिसत्त्वः किं दृष्ट्वा करुणायमानः अभवत्?

(घ) 'भक्षयितुम्' अत्र कः प्रत्ययः?

10. कोष्ठकाद् उपयुक्तशब्दं चित्वा रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत- (केवलं चत्वारः प्रश्नाः) 4×1=4

| | |
|---|---|
| (क) ज्योतिषां ज्योतिः मनः कथ्यते। | (केषां / कासां) |
| (ख) शक्रः देवानां राजा आसीत्। | (कः / के) |
| (ग) सञ्जयः सिन्धुराजेन निर्जितः आसीत्। | (केन / केभ्यः) |
| (घ) रोहसेनः सुवर्णशकटिकया क्रीडितुम् इच्छति। | (काया / कया) |
| (ङ) आकाशे अकालाः अपि मेघाः प्रादुरभवन्। | (के / कैः) |

## (संस्कृत-साहित्य-परिचयः)

11. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया एकपदेन लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

(क) मृच्छकटिकस्य रचयिता कः?
(ख) जातकमालायाः रचयिता कः?
(ग) महाभारतस्य रचयिता कः?
(घ) श्रीमद्भगवद्गीतायां कति अध्यायाः सन्ति?
(ङ) रामायणे कति काण्डानि सन्ति?

12. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया एकपदेन लिखत -(केवलं प्रश्नचतुष्टयम्) 4×1=4

(क) पृथिवीसूक्तं कस्मिन् वेदेऽस्ति?
(ख) 'परोपकाराय सतां विभूतयः' इति पाठः कस्मात् ग्रन्थाद् उद्धृतः?
(ग) 'मानो हि महतां धनम्' इति पाठः कस्मात् ग्रन्थाद् उद्धृतः?
(घ) 'सन्ततिप्रबोधनम्' इति पाठः कस्मात् ग्रन्थाद् उद्धृतः?
(ङ) चरकस्य रचनायाः नाम किम्?

## खण्डः– 'घ'

## अनुप्रयुक्त-व्याकरणम्

13. गुणसन्धेः अथवा विसर्गसन्धेः परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2
14. द्वन्द्वसमासस्य अथवा कर्मधारयसमासस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2
15. करणकारकस्य अथवा सम्प्रदानकारकस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

## खण्डः – 'ङ'

## पाठाधारिताः बहुविकल्पीयाः प्रश्नाः

16. अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्तवैकल्पिकचतुर्भ्यः उत्तरेभ्यः एकं शुद्धम् उत्तरं चित्वा लिखत - 17×1=17

1) 'म' इत्यस्य वर्णस्य उच्चारणस्थानं किम्?
(क) ओष्ठौ (ख) कण्ठः
(ग) नासिका (ग) ओष्ठौ नासिका च

2) 'ट' इत्यस्य वर्णस्य उच्चारणस्थानं किम्?
(क) ओष्ठौ (ख) कण्ठः
(ग) नासिका (ग) मूर्धा

3) "अधिगम्य" इत्यस्मिन् पदे कः प्रत्ययः ?
(क) क्त्वा (ख) शतृ
(ग) ल्यप् (ग) तुमुन्

4) "पुनरपि" इत्यस्य पदस्य सन्धिविच्छेदोऽस्ति –
(क) पुन + अपि (ख) पुनः + अपि
(ग) पुनर + अपि (घ) पुनः + रपि

5) "प्रति+अहम्" इत्यत्र सन्धियुक्तपदं किम्?
(क) प्रत्यहम (ख) प्रत्यहम्
(ग) प्रत्याहम् (घ) प्रतिअहम्

6) "मत्स्याधिपतिः" इत्यत्र कः समासः ?
(क) अव्ययीभावसमासः (ख) तत्पुरुषसमासः
(ग) कर्मधारयसमासः (घ) द्वन्द्वसमासः

7) "अजीर्णे" इत्यत्र समासविग्रहोऽस्ति -
(क) अजीर्णे (ख) अजीर्ण
(ग) जीर्णे च (घ) न जीर्णे

8) "मीनः" इत्यस्य पदस्य पर्यायवाचकम् अस्ति -

(क) मत्स्यः (ख) खगः

(ग) मेघः (घ) कपोतः

9) "पर्जन्यः" इत्यस्य पदस्य पर्यायवाचकं किम् ?

(क) नदी (ख) रात्रम्

(ग) प्रतिहाराः (घ) जलदः

10) "कापुरुषः" इत्यस्य पदस्य विलोमपदं किम् ?

(क) वीरपुरुषः (ख) मत्स्यः

(ग) कल्याणाः (घ) विश्रुता

11) "अचिरेण" इत्यस्य पदस्य विलोमपदं किम् ?

(क) विलम्बेन (ख) अतुलः

(ग) चिरेण (घ) हत्वा

12) "गृहीत्वा" इत्यस्मिन् पदे कः प्रत्ययः ?

(क) तुमुन् (ख) क्त

(ग) शतृ (घ) क्त्वा

13) "प्रमृज्य" इत्यस्मिन् पदे कः प्रत्ययः ?

(क) क्त्वा (ख) शतृ

(ग) ल्यप् (ग) तुमुन्

14) "सह" इत्यस्मिन् उपपदयोगे का विभक्तिः भवति ?

(क) चतुर्थी (ख) षष्ठी

(ग) सप्तमी (घ) तृतीया

15) "अभितः" इत्यस्मिन् उपपदयोगे का विभक्तिः भवति ?

(क) तृतीया (ख) षष्ठी

(ग) द्वितीया (घ) पञ्चमी

16) "क्रूरा शतघ्नी" अत्र विशेष्यपदं किम् ?

(क) क्रूरा (ख) क्रूरा शतघ्नी

(ग) शतघ्नी (घ) क्रूरशतघ्नी

17) "सलिलतीरवासिनः पक्षिणः" अत्र विशेषणपदं किम् ?

(क) सलिलतीर (ख) पक्षिणः

(ग) सलिलतीरवासिनः (घ) वासिनः